श्म० श्रीमद्विद्यात्मने नमः ॥ न त्वा नाथं च देवीं च कृष्णावेणां ग
१ णाधिपं ॥ गंगाधरानंदनाथः स्तनोति कालिपूजनं ॥ १ ॥ अ
थ श्मशानकालिविधिर्निरूप्यते ॥ मुहूर्ते ब्राह्म उत्था
य गुरुं गणपतिं इष्टदेवतां च स्मृत्वा मनसा द्वादशवारं मूलमंत्रं
जपेत् ॥ ततः शौचं निवर्त्य दंतधावनं कुर्यात् ॥ तद्यथा ॥ आ
युर्बलं यशो वर्चः प्रजाः पशून्वसूनि च ॥ ब्रह्मप्रज्ञां च मेधां
च त्वं नो देहि वनस्पते ॥ इति मंत्रेण दंतकाष्ठमभिमंत्र्य ॥
क्लीं कामदेवाय सर्वजनप्रियाय नमः इति मंत्रेण दंतधा
वनं ॥ कफविमोचनना साशोधन दूषिका निरसनपू
र्वं विहितविंशति गंडूषः ॥ दशाष्ट साम्लेन मुखं प्रक्षालयेत् ॥

शंकर
१



ततो नद्यादौ स्थलुक्तः स्नानोत्तरं श्रीश्मशानकालिकाप्रीत्यर्थं
तांत्रिकस्नानं करिष्य इति संकल्प्य जले पुरतो हस्तमात्रं मंडलं
परिगृह्य ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्ये
न मे देव तीर्थं देहि दिवाकर ॥ इति मंत्रेण सूर्यमभ्यर्थ्य
आवाहयामि त्वां देवि स्नानार्थमिह सुंदरि ॥ एहि गंगे न
मस्तुभ्यं सर्वतीर्थसमन्विते ॥ इति गंगां प्रार्थ्य ॥ वं इति बी
जेन सप्तवारमभिमंत्र्य मूलं चावर्त्य त्रीनुदकांजलीन्
शिरसि दत्वा त्रिरपश्च पीत्वा मूलमुच्चर्य श्रीश्मशानकालि
कां तर्पयामीति त्रिः संतर्पयेत् ॥ ततो भस्मधारणं कृत्वा निस
[redacted] संध्यां समाप्य उपास्य संध्यां कुर्यात् ॥ तद्यथा ॥

श्म० ऐं ह्रीं श्रीं क्लीं आत्मतत्त्वाय स्वाहा ॥ कालिके विद्यातत्त्वाय स्वाहा ॥
२ ऐं ह्रीं श्रीं क्लीं शिवतत्त्वाय स्वाहा ॥ एवं त्रिराचम्य प्राणानायम्य मू
लेन ॥ त्रिरात्मानं प्रोक्ष्य ॥ ह्रां ह्रीं ह्रूं सः मार्तंडभैरवाय प्रकाशश
क्तिसहिताय स्वाहेति सूर्याय त्रिरर्घ्यं दत्वा तन्मंडले उपास्यदेव
तां विचिंत्य ॥ मूलेन देव्यै त्रिरर्घ्यं दत्वा त्रिःसंतर्प्य मूलेन पू
र्ववदाचम्य मूलस्य ऋष्यादिन्यस्य अष्टोत्तरशतं मूलेन सायु
ह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ॥ त्वत्प्रसादान्महा
देवि सिद्धिर्भवतु मे सदा ॥ इति जपं समर्पयेत् ॥ अथ पूजा ॥
मौनवान् यागमंदिरमागत्य पश्चिमद्वारे निषण्णः दक्षवामशाख
योरूर्ध्वभागे च ॥ ऐं ह्रीं श्रीं क्लीं भद्रकाल्यै नमः ॥ ४ भैरवाय
नमः ॥ ४ लंबोदराय नमः ॥ इति तिस्रो द्वारदेवताः संपूज्यांतः प्रवि शंकर
३ २

श्याचम्य प्राणानायम्य देशकालौ संकीर्त्य मम श्रीश्मशानकालिका
प्रसादसिद्ध्यर्थं यथाशक्तिक्रमं निर्वर्तयिष्य इति संकल्प्य गंधमा
ल्यादिना आसनं मूलेन कृत्वा तां मूलेन करभित्त्ववदनः ॥ सौः इति
मंत्रेणासनमभिमंत्र्य मूलेन प्रोक्ष्य ॥ ४ आधारशक्तिकमला
सनाय नमः इति आसनं संपूज्य ॥ प्राङ्मुखो वोदङ्मुखो वा उपविश्य ॥
४ रं रक्तद्वादशशक्तियुक्ताय दीपनाथाय नमः इति मंत्रेण स्वपु
रतो भूमौ दीपनाथं संपूज्य ॥ समस्तप्रकटगुप्तसिद्धयोगिनी
चक्रश्रीपादुकाभ्यो नमः ॥ इति मूर्ध्नि बद्धांजलिः स्ववामद
क्षभागे ॥ ४ गुं गुरुभ्यो नमः ॥ ४ गं गणपतये नमः ॥ इति गु
रुं गणपतिं च प्रणम्य ॥ ततः ऐं ह्रः अस्त्राय फट् इति मंत्रेण
अंगुष्ठादिकरतलांतं कूर्परयोर्देहे च व्यापकं कुर्यात् ॥ [illegible]यं
४

श्म०	चदेवतारूपंविभाव्य ॥ अपसर्पंतु ये भूता ये भूता भूमिसंस्थिता ॥ ये भूता
विघ्नकर्तारस्ते नश्यंतु शिवाज्ञयेति मंत्रेण रूद्धृत्वार्य युगपद्वामपार्ष्णि
३	[redacted] भूतलाघातकरास्फोटत्रयकूर्द्धदृष्ट्यावलोकनपूर्वं तालत्रयेण भौ
मांतरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् ॥ ततः नम इत्यंगु
ष्ठमंत्रमुच्चारयन् कुशेन शिखां बध्वा श्रीकालीरूपमात्मानं भावयन्
ततो भूतशुद्धिमातृकान्यासं च कुर्यात् ॥ पिंगलयानाड्यांतरा सुष्व
४ मूलशृंगाटकात्सुषुम्नापथेन जीवशिवं परशिवपदे योजयामि
स्वाहेति मंत्रेण मूलाधारस्थितं जीवं सुषुम्नानाडीमार्गेण ब्रह्मरं
ध्रं नीत्वा परशिवेनैकीभूतं विभाव्य[illegible]चयेत् ॥ एवमुत्तर
त्राणि ॥ ४ यं संकोचशरीरं शोषय शोषय स्वाहा ॥ इति शुष्कं ॥ रं संको
चशरीरं दह दह पच पच स्वाहा ॥ इति दग्धं ॥ वं परशिवामृतं वर्ष
य वर्षय स्वाहा ॥ इति आर्द्रं ॥ ४ लं शांभवशरीरमुत्पादयोत्पादय	शंकर
३



स्वाहा ॥ इति उत्पन्नं ॥ ४ हंसः सोहमवतरावतर शिवपदाज्जीव सुषु
म्नापथेन प्रविश मूलशृंगाटकमुल्लसोल्लस ज्वल ज्वल प्रज्वल प्रज्वल हंसः सोहं
स्वाहा ॥ इति मंत्रेण ब्रह्मरंध्रं नीतं जीवं मूलाधारे स्थापयेत् ॥ इति
भूतशुद्धिः ॥ हृदि दक्षकरतलं निधाय ॥ ४ आं[illegible]सोहमिति त्रिः पठेत् ॥
ततो मूलेन सप्तधा प्राणानायम्य मातृकान्यासं कुर्यात् ॥ अस्य
श्रीमातृकान्यासस्य ब्रह्मणे ऋषये नमः शिरसि ॥ गायत्रीछंदसे न
मः मुखे ॥ मातृकासरस्वत्यै देवतायै नमः हृदये ॥ हल्भ्यो बीजेभ्यो
नमः गुह्ये ॥ स्वरेभ्यः शक्तिभ्यो नमः पादयोः ॥ बिंदुभ्यः कीलके
भ्यो नमः नाभौ ॥ श्मशानकाली अंगत्वेन न्यासे विनियोगाय
नमः करसंपुटे ॥ सर्वमातृकया अंजलिना त्रिर्व्यापकं सर्वांगे ॥
४ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः ॥ ४ इं चं छं जं झं ञं ईं तर्जनीभ्यां ॥

१म० ४उं टं ठं डं ढं णं ऊं मध्यमाभ्यां०॥४ ऐं तं थं दं धं नं ऐं अनामिकाभ्यां०॥४ ओं
तं थं दं धं नं औं कनिष्ठिकाभ्यां॥४ अं यं रं लं वं शं षं सं हं ळं क्षं अः करत
४ लकरपृष्ठाभ्यां०॥ एवं हृदयादि॥ हृदयाय नम०॥ शिरसे स्वाहा॥
शिखायै वषट्॥ कवचाय हुं॥ नेत्रत्रयाय वषट्॥ अस्त्राय फट्॥
ध्यानं [illegible]॥ पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिव
क्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां॥ अ
क्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणामब्जसंस्थामच्छाक
ल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि॥ इति ध्यात्वा म
नसा पुष्पांजलिं दत्वा स्वांगेषु न्यसेत्॥ ऐं ह्रीं श्रीं क्लीं अं नमः शि
रसि॥४ आं नमः मुखे॥४ इं० दक्षनेत्रे॥४ ईं० वामनेत्रे॥४ उं० दक्ष
कर्णे॥४ ऊं० वामकर्णे॥४ ऋं० दक्षगंडे॥४ ॠं० वामगंडे॥४ ऌं० नासा १पंक्र ४



सादक्षपुटे॥४ ॡं० तद्वामपुटे॥४ एं० ऊर्ध्वोष्ठे॥४ ऐं० अधरोष्ठे॥४ ओं०
ऊर्ध्वदंतपंक्तौ॥४ औं० अधोदंतपंक्तौ॥४ अं० शिरसि॥४ अः०
मुखांतः॥४ कं० दक्षबाहुमूले॥४ खं० तन्मध्ये॥४ गं० तन्मणि
बंधे॥४ घं० तदंगुलिमूले॥४ ङं० तदंगुल्यग्रे॥४ चं० वामबा
हुमूले॥४ छं० तन्मध्ये॥४ जं० तन्मणिबंधे॥४ झं० तदंगुलि
मूले॥४ ञं० तदंगुल्यग्रे॥४ टं० दक्षोरुमूले॥४ ठं० तन्मध्ये॥४ डं० त
ज्जंघायां॥४ ढं० तदंगुलिमूले॥४ णं० तदंगुल्यग्रे॥४ तं० वामो
रुमूले॥४ थं० तन्मध्ये॥४ दं० तज्जंघायां॥४ धं० तदंगुलिमूले
॥४ नं० तदंगुल्यग्रे॥४ पं० दक्षपार्श्वे॥४ फं० वामपार्श्वे॥४ बं० पृष्ठे॥
४ भं० नाभौ॥४ मं० जठरे॥४ यं० हृदि॥४ रं० दक्षकक्षे॥४ लं० अपर

गले ॥ ॐ वं० वामकक्षे ॥ ॐ शं० हृदादिदक्षकराग्रांतं ॥ ॐ षं० हृदा
१म० दिवामकराग्रांतं ॥ ॐ सं० हृदादिदक्षपादाग्रांतं ॥ ॐ हं० हृदादि
५ वामपादाग्रांतं ॥ ॐ ळं० हृदादिगुह्यांतं ॥ ॐ क्षं० हृदादिमूर्धां
तं ॥ इति मातृकान्यासः ॥ ● अथ सिंदूरादिना श्रीश्मशानकालीयंत्रं १८
निर्माय पीठपूजां कुर्यात् ॥ यंत्रोद्धारो यथा ॥ प्रथमष्टदलं वृत्तेन बाह्ये
धरणीतलं ॥ चतुर्द्वारसमायुक्तं मध्ये मन्त्रं समालिखेत् ॥ दलेष्वष्टासु
विलिखेत् कवर्गाद्यष्टवर्गकं ॥ धरण्यां विलिखेद् बीजं चतुष्कं च चतुष्ककं ॥
पूर्वादि उत्तरांतायां मध्ये देवीं प्रपूजयेत् ॥ ब्राह्म्याद्याः पूजयेन्मातृः
दलेष्वष्टासु सर्वतः ॥ भैरवान् असितांगाद्याः धरण्यां पूजयेत् प्रिये ॥ ए
वं यंत्रं निर्माय प्राणप्रतिष्ठां कुर्यात् ॥ ॐ श्मशानकालीयंत्रस्य प्राणा इह
प्राणाः कालीयंत्रस्य जीव इह स्थितः । कालीयंत्रस्य सर्वेन्द्रियाणि इहा
यांतु स्वाहेति प्राणप्रतिष्ठां विधाय पीठपूजामारभेत् ॥ यथा ॥ शंकर

५



ॐ श्मशानाय ॥ ॐ कल्पवृक्षाय ॥ ॐ नरधारेभ्यो कालीकायै ॥ ह
नक्षत्रलं

ॐ मं मण्डूकाय नमः ॥ ॐ कं कालाग्निरुद्राय नमः ॥ ॐ आं आधारशक्त्यै० ॥ ॐ प्रकृ
त्यै० ॥ ॐ कूं कूर्माय० ॥ ॐ अं अनंताय० ॥ ॐ पृथिव्यै० ॥ ॐ सुधासमुद्राय० ॥ ॐ मणिद्वी
पाय० ॥ ॐ चिंतामणिगृहाय० ॥ ॐ पारिजातवना० ॥ ॐ रत्नगृहा० ॥ ॐ सिंहासना० ॥ ॐ
तच्चतुर्दिक्षु नानामुनिभ्यो० ॥ ॐ शिवाभ्यो ॥ ॐ शिवेभ्यो० ॥ ॐ मुंडेभ्यो० ॥ ॐ ततः
पूर्वादौ धर्माय० ॥ ॐ ज्ञानाय० ॥ ॐ वैराग्याय० ॥ ॐ ऐश्वर्याय० ॥ ॐ आग्नेयादि
दिक्षु अधर्माय० ॥ ॐ अज्ञाना० ॥ ॐ अवैराग्या० ॥ ॐ अनैश्वर्या० ॥ ॐ आनंदकं
दा० ॥ ॐ संविन्नालाय० ॥ ॐ सर्वतत्त्वात्मकपद्मा० ॥ ॐ प्रकृतिमयपत्रेभ्यो० ॥ ॐ विका
रमयकेसरेभ्यो० ॥ ॐ पंचाशद्वर्णभूषितकर्णिकायै० ॥ ॐ अं अर्कमंडलाय
द्वादशकलात्मने० ॥ ॐ षोडशकलात्मने सोममंडलाय० ॥ ॐ दशकलात्म
ने वह्निमंडलाय० ॥ ॐ सं सत्त्वा० ॥ ॐ रं रजसे० ॥ ॐ तं तमसे० ॥ ॐ आत्मने० ॥ ॐ
अं अंतरात्मने० ॥ ॐ परमात्मने ॥ ॐ ज्ञानात्मने० ॥ ॐ इच्छायै० ॥ ॐ ज्ञानायै० ॥ ॐ
क्रियायै० ॥ ॐ कामिन्यै० ॥ ॐ कामदायिन्यै० ॥ ॐ रत्यै० ॥ ॐ रतिप्रियायै० ॥ ॐ आनंदायै

श्म० ४ मध्येमनोन्मन्यै० ॥ ४ ऐं परायै० ॥ ४ ऐं अपरायै० ॥ ४ ऐं परापरायै० ॥ ४ ह्सौं
६ सदाशिवमहाप्रेतपद्मासनाय० ॥ इति पीठदेवताः संपूज्य मानसोपचारैः
संपूज्य स्वयं युवतिवेषधारी सिंदूरांकितभालः तांबूलपूरितमुखः वामे
मदोन्मत्तां स्वदाररतेः साभिलाषां लज्जाभयविवर्जितां संस्थाप्य सामान्य
विशेषार्घ्यौ वा साधयेत् ॥ आदौ स्ववामभागे कलशमापूर्य गंधादिना सं
पूज्य मूलेन सप्तवारमभिमंत्र्य तज्जलेन बिंदुत्रिकोणषट्कोणवृत्तचतु
रस्रं मंडलं कृत्वा तस्य अग्नीशासुरवायुकोणेषु पूर्वादिदिक्षु च
क्रमेण ॥ ऐं ह्रीं श्रीं क्लीं हृदयाय नमः ॥ कालिके शिरसे स्वाहा ॥ ऐं ह्रीं श्रीं
क्लीं शिखायै वषट् ॥ [redacted] ऐं ह्रीं श्रीं क्लीं कवचा
य हुं ॥ कालिके नेत्रत्रयाय वषट् ॥ ऐं ह्रीं श्रीं क्लीं अस्त्राय फट् ॥ इति
मंत्रैः षडंगमभ्यर्च्य ॥ तस्योपरि अस्त्रेण क्षालितमाधारं ॥ ४ अं अ शंकर
६

अस्य धूर्वादिचतुर्दिगधिकरणकं सहरेकमेवाल्पे ...



ग्निमंडलाय दशकलात्मने अर्घपात्राधाराय नमः इति मंत्रेणाधारं स्थाप्य अ
ग्निमंडलत्वेन ध्यातस्य तस्य पश्चिमादिप्रादक्षिण्येन ॥ ४ धूम्रार्चिषे नमः ॥ ४ न
उष्मायै० ॥ ४ ज्वलिन्यै० ॥ ४ ज्वालिन्यै० ॥ ४ विस्फुलिंगिन्यै० ॥ ४ सुश्रियै० ॥ ४
सुरूपायै० ॥ ४ कपिलायै० ॥ ४ हव्यवाहायै० ॥ ४ कव्यवाहायै० ॥ इति दश
वह्निकलाः संपूज्य आधारोपरि अस्त्रेण क्षालितं शंखं ॥ ४ क्लीं सूर्यमं
डलाय द्वादशकलात्मने अर्घपात्राय नमः इति आधारोपरि स्थाप्य तस्य
पश्चिमादिप्रादक्षिण्येन ॥ ४ तपिन्यै० ॥ ४ तापिन्यै० ॥ ४ धूम्रायै० ॥ ४
मरीच्यै० ॥ ४ ज्वालिन्यै० ॥ ४ रुच्यै० ॥ ४ सुषुम्णायै० ॥ ४ भोगदायै० ॥ ४
विश्वायै० ॥ ४ बोधिन्यै० ॥ ४ धारिण्यै० ॥ ४ क्षमायै० ॥ इति द्वादश सू
र्यकलाः संपूज्य तस्मिन् शंखे ॥ ४ सौः षोडशकलात्मने अमृताय नम
इत्युदकेन पूर्णं सोममंडलत्वेन ध्यातस्य तस्य पश्चिमादिप्राद
क्षिण्येन ॥ ४ अमृतायै० ॥ ४ मानदायै० ॥ ४ पूषायै० ॥ ४ तुष्ट्यै० ॥ ४ पुष्ट्यै०

मध्ये क्षीरबिंदुं दत्वा

ये०॥४ धूम्रायै०॥४ शाकिन्यै०॥४ चंद्रिकायै०॥४ कांत्यै०॥ ज्योत्स्नायै०॥
यै०॥४ प्रीत्यै०॥४ अंगदायै०॥४ पूर्णायै०॥४ पूर्णामृतायै०॥ इतिषो
सोमकला: संपूज्य अस्त्राय फट् इत्यस्त्रेण संरक्ष्य धेनुमुद्रां प्र
दर्श्य पूर्वोक्तषडंगै: संपूज्य योनिमुद्रां प्रदर्श्य मूलेन सप्तवारमभिमंत्र्य
तद्बिंदुभि: आत्मानं पूजोपकरणानि चावोक्ष्य किंचित्कलशे निक्षिपे
त्॥ इति सामान्यार्घ्यविधि:॥ तद्दक्षिणत: मूलेन पूर्ववत्तद्दक्षि
णत: मंडलं परिकल्प्य बिंदौ सानुस्वारं ईकारं विलिख्य तत्र पूर्ववत्
षडंगं विन्यस्य॥ तदुपरि अस्त्रेण क्षालितमाधारं संस्थाप्य प्राग्व
द्दशवह्निकला: संपूज्य तदुपरि अस्त्रेण क्षालितं पात्रं प्राग्वत्संस्था
प्य॥ तस्मिन्पात्रे॥४ ह्रीं ऐं महालक्ष्मीश्वरि परमस्वामिनि ऊर्ध्वशून्य
प्रवाहिनि सोमसूर्याग्निभक्षिणि परमाकाशभासुरे आगच्छ आगच्छ
विश विश पात्रं प्रतिगृह्ण प्रतिगृह्ण हुं फट् स्वाहेति पुष्पांजलिं विकीर्य शंकर

७



प्रागुक्तरीत्या द्वादशसूर्यकला: संपूज्य तस्मिन्पात्रे प्रागुक्तमंत्रेणाम
मापूर्य द्वितीयतृतीयशकलानि संमिश्य प्रागुक्तषोडशसोमकला:
संपूज्य॥ तस्मिन्नर्घ्यपात्रे अकथादि षोडश षोडश वर्णात्मकं त्रिको
णं विलिख्य तत्कोणेषु हंसान्तर्बहिश्च वृत्तं विलिख्य मध्ये तुरी
यं स्वरं विलिख्य तद्बहिश्च षट्कोणं निर्माय प्रागुक्तं गंधा षडंगमंत्रै:
षडंगं संपूज्य॥४ हृदयाय नम: हृदयशक्ति श्रीपादुकां पूजयामि॥
कालिके शिरसे०॥ शिर:श० पूजयामि॥४ शिखायै० शिखाशक्ति०॥४
कवचाय हुं कवचशक्ति०॥ कालिके नेत्र० नेत्रशक्ति०॥४ अस्त्राय फट्
अस्त्रशक्ति श्रीपादुकां पूजयामि॥ इति षडंगमभ्यर्च्य॥ अस्त्राय
फट् इत्यस्त्रेण संरक्ष्य कवचेनावगुंठ्य धेनुयोनिमुद्रे प्रदर्श्य मूलेन
सप्तवारमभिमन्त्र्य तदर्घ्यबिंदुज्ञानांतरेण किंचित् बिंदुद्वयं मुखे पात्रे शिर
तदर्घ्यबिंदुज्ञानांतरेण किंचित् बिंदुद्वयं स्वाहेति तत्रैव

हृं त्रिरि [redacted] स्वामू ऋमंत्रंसर्वंतु च्चार्य सर्वतितेन कुर्यात् ॥ संत्रि
गुरो पुतस्य चतुष्पंद स्तानंतरं स्वयंग णहीयात् ॥ इति विशेषार्घ्यं
॥ अथ मूला धारादि अलरंध्रपर्यंतां कोटि सूर्य प्रभाम स्विकुं
डलिनीं ध्यात्वा तत्र कालिकां विचिंत्य ॥ ४ ऐं ह्रीं कालिके अमृतचैत
न्यमूर्तिं कल्पयामीति कालिके दिव्यदेहं विचिंत्य त्रिखंडा मुद्रां नंदि
नां कुसुमगर्भितिं जलेो समानीय ॥ ४ महापद्मवनांतस्थे कारणानं
दविग्रहे ॥ सर्वभूतहिते मातरेह्येहि परमेश्वरीति पीठगतयंत्रे
आवाहयेत् ॥ आवाहन संस्थापन संनिधापनैर् निरोधन स — सं
मुखीकरणावगुंठन धेनुयोनि मुद्रां प्रदर्श्य तत्तदन्विकं भावयन्
पूजयेत् ॥ ततः श्रीकालिके उपचारानाचरेत् ॥ ४ कालिके पाद्यं
कल्पयामि ॥ ४ कालिके अर्घ्यं क० ॥ ४ कालिके आचमनीयं क० ॥ ४ — शंकर



४ कालिके स्नानं ० ॥ ४ पंचामृतस्नानं ॥ ४ कालिके अभ्यंगं ० ॥ ४ कालिके उं
गोद्वर्तनं ० ॥ ४ कालिके उष्णोदकस्नानं ० ॥ ४ कालिके सकल तीर्थाभिषेकं ० ॥ ४ का
लिके धौतवस्त्रपरिमार्जनं ० ॥ ४ कालिके वस्त्रं ० ॥ ४ कालिके उपवीतं ० ॥ ४ कालिके कं
चुकीः ० ॥ ४ कालिके मणिमयपीठोपवेशनं ॥ ४ कालिके चंदनं हरिद्रां कुंकुमं
सिंदूरं कल्प० ॥ ४ कालिके नानाविध पुष्पाणि ० ॥ ४ कालिके धूपं ० ॥ ४ कालिके
दीपं ० ॥ ४ कालिके नैवेद्यं ० ॥ नैवेद्यांते आचमनीयं मध्ये पानीयं उत्तरापो
शानं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनं तांबूलं दक्षिणां कर्पूर
नीराजनादि दत्वा आवरणपूजां कुर्यात् ॥ मध्ये मूले नदशधा
श्रीदेवीं संतर्पयेत् इति प्रथमावरणं ॥ अथाष्टदले ॥ ४ ब्राह्मीश्री
पादुकां पूजयामि ॥ ४ माहेश्वरी श्रीपादुकां ० ॥ ४ कौमारी श्रीपा० ॥ ४
वैष्णवी श्री० ॥ ४ वाराही श्री० ॥ ४ इंद्राणी श्री० ॥ ४ चामुंडा श्री० ॥ ४ महा
आदेवतुरमंडलार्चनं ४

ळ स्मीश्रीपादुकां० ॥ इति द्वितीयावरणं ॥ अथ प्रथमपुरे च तुर्दिक्षु ॥ ॐ असितांगभैर
इ०म० वश्रीपा० ॥ ४ रुरुभैरवश्रीपा० ॥ ४ चंडभैरवश्रीपा० ॥ ४ क्रोधभैरवश्री० ॥ ४
१ उन्मत्तभैरवश्रीपा० ॥ ४ कपालिभैरवश्री० ॥ ४ भीषणभैरवश्री० ॥ ४ सं
हारभैरवश्रीपादुकां पूजयामि ॥ इति तृतीयावरणं ॥ पुनः देवीं दशध्यानत
चेत् दशावरणमिष्ट्वा पुनः धूपदीपौ कल्पयित्वा महानैवेद्यं समर्पयेत् ॥
श्रीमहादेव्याम्बाश्रीपादुकां० ॥ ४ महादेवा +
+ आदौ गुरुमंडलार्चनं ॥ ४ श्रीमहादेव्याम्बाश्रीपादुकां० ॥ ४ श्रीभैरवानंदनाथश्री० ॥ ४ सिद्धि +
+ नंदनाथश्री० ॥ ४ त्रिपुराम्बाश्री० ॥ ४ श्रीभैरवानंदनाथश्री० ॥ ४ सिद्धि +
+ ओघः ॥ ४ मूलानंदनाथश्री० ॥ ४ दुर्गादेवानंदनाथश्री० ॥ ४ चतुश्चिता +
+ नंदनाथश्री० ॥ ४ चक्राञ्चलानंदनाथश्री० ॥ ४ कुमारानंदनाथश्री० ॥ +
+ ४ क्रोधानंदनाथश्री० ॥ ४ वरदानंदनाथश्री० ॥ ४ स्मरदीपनानंदनाथ +
+ श्री० ॥ ४ मायावत्यम्बाश्री० ॥ इति सिद्धौघः ॥ ४ विमलानंदनाथश्री० ॥ +
+ ४ कुशलानंदनाथश्री० ॥ ४ भीमसेनानंदनाथश्री० ॥ ४ सुधाकरानंद +
+ नाथश्री० ॥ ४ मीनानंदनाथश्री० ॥ ४ गोरक्षानंदनाथश्री० ॥ ४ +
+ भोजदेवानंदनाथश्री० ॥ ४ प्रजापतिदेवानंदश्री० ॥ ४ मूलदेवानंदश्री +



रति + ४ देवानंदनाथश्री० ॥ ४ विघ्नेश्वरानं० ॥ ४ हुताशनानंदनाथश्री० ॥ ४ +
+ समयानंदनाथश्री० ॥ ४ संतोषानंदनाथश्रीपादुकां पूजयामीति +
+ गुरुमंडलार्चनं विधाय स्वगुरुं शिरसि त्रिरिष्ट्वा नंतरं आवरण +
+ पूजां कुर्यात् ॥ अथ शोधः निरंकनवमपत्रस्य अधश्च तेषां प्रतिस्पः ॥ ॥ +
नैवेद्यानंतरं आचमनीयं गंधलं कर्पूरनीरां जनं दत्वा क्षीरं मज्जाद्य
अंतसो ओषहि स्वेजए कीर्त्तु मितप्रभं ॥ त्रिधा दीपं परिभ्राम्य कु
लदीपं निवेदयेत् इति त्रिधा परिभ्राम्य समापयेत् ॥ शिवे शिव
स्कशील त्वाम्नत लरंगगं धौ कुसुमयावरणदेवते नवनवान्त
रं दिनि ॥ गुरुक्रम पुरस्कृते गुण शरीर नित्योद्वले षडंगपरि
वारिते कलिते पपुष्पांजलिः इति मंत्रपुष्पांजलीं दत्वा ॥
अथ बलिः ॥ त्रिकोण षट्कोणं यंत्रं निर्माय ऐं व्यापक मंडलाय न
म इति संपूज्य ॥ तदुपरि संवह्निं स्थाप्य ॥ ह्रीं सर्वविघ्नकृद्भ्यः सर्व

श्म० १० भूतेभ्यो हुं फट् स्वाहेति मंत्रं त्रिः पठित्वा तत्खड्गदास्फटं सालिलं वस्तुपरि
पातयेत् ॥ युगपद्वामपाणिं घातकरास्फोटीकुर्वाणः सम्मुदं चितवक्त्रो
बाण मुद्रया भूतैर्वलिं ग्राहितं भावयेत् इति बलिदानं ॥ अथ प्रदक्षि
णनमस्कारानंतरं ॥ अस्य श्रीश्मशानकालिकामहामंत्रस्य ॥ भ
गुरुऋषये नमः शिरसि ॥ निरर्वृत्तिछंदसे नमः मुखे ॥ श्मशानकालि
कादेवतायै नमः हृदये ॥ ऐं बीजाय नमः गुह्ये ॥ क्लीं शक्तये नमः
पादयोः ॥ ह्रीं कीलकाय नमः नाभौ ॥ श्मशानकालिकाप्रसादसि
ध्यर्थे जपे विनियोगाय नमः करसंपुटे ॥ ऐं ह्रीं श्रीं क्लीं अंगुष्ठा० ॥
कालिके तर्जनीभ्यां० ॥ ऐं ह्रीं श्रीं क्लीं मध्यमा० ॥ ऐं ह्रीं श्रीं क्लीं अना
मिकाभ्यां० ॥ कालिके कनिष्ठिका० ॥ ऐं ह्रीं श्रीं क्लीं करतलकर० ॥
एवं हृदयादि ॥ अथ ध्यानं ॥ अंजनाद्रि निभां देवीं श्मशानालयवा शंकर १०



सिनीं विसादाय ॥ साधुवासाधु वा कर्म यद्यदाचरितं शिवे ॥ तत्सर्वं कृपया
देवि गृहाणाराधनं मम ॥ इति दिव्ये निवेद्य ॥ सावर्णा देवी ह्रादिनी सा ॥
संरक्षकानां परिपालकानां जितेंद्रियाणां च तपोधनानां ॥ देशस्य राष्ट्रस्य
कुलस्य राज्ञां करोतु शांतिं भगवान् कुलेशः ॥ नंदंतु साधककुलान्य
णिमादि सिद्धाः शापाः पतंतु समयद्विषु योगिनीनां ॥ साधां भवी सु
रगुरुकापिमभाष्य वश्यां मस्तां गुरोश्चरणपंकजमेव लभ्यं ॥ शिवा
द्यं विपर्यंतं ब्रह्मादि स्तंबसंयुतं ॥ कालाग्न्यादि शिवांतं च जग
यज्ञेन तृप्यतु ॥ इति पठित्वा विशेषार्घ्यपात्रमामस्तु जुहुयात् मूले
न गुरुपात् ॥ ततः तीर्थ निर्माल्ये स्वीकृत्य यथाशक्ति ब्राह्मणा
न्सुवासिनीश्च भोजयेत् ॥ ऐं गंगाधरानंदनाथ गुरु श्रीपादुकां
पूजयामि ॥ ह्रीं चिछक्तिपवासहित अम्ब्रोशानंदनाथ परमगुरु श्री०
श्रीं गौरीश्वकांबासहित परमकाशानंदनाथ परमेष्ठी गुरु श्रीपा० ॥
शके १७६५ माघ वा ४ समाप्तमिदं गच्छे शेन लिखितं ॥ ॥